OM

रुद्राष्टध्यायि

(Kanwa Shukla Yajurvediya)

By

Debadatta Dash , Brahmapur, Orissa

dev.sendmail@gmail.com

Rudrashtadhyayee as per Kanwa Shukla YajurVeda as pracriced in Orissa.

प्रथमोध्याय़ः

(शिबसङ्कल्प सूक्तः)

ॐ ग॒णाना॑म् त्वा ग॒णप॑तिगुं हवामहे प्रियाणां त्वा प्रियपतिगुं हवामहे निधीनां त्वा निधीपति गुं हवामहे वसो मम। आहमजानि गर्भध मात्वमजासि गर्भधम् ॥१॥

गायत्री त्रिष्टुब् जगत्यन्युष्टुप् पंक्त्यासह । बृहत्युष्णि ककुप् सूचीभिः सम्यन्तुत्बा ॥ २॥

द्बिपदाया श्चतुष्पदा स्त्रीपदा याश्चषट्पदाः । ब्बिच्छन्दा याश्चसछन्दाः सूचीभिः शम्यन्तुत्वा ॥ ३॥

सहस्तोमाः सहच्छन्दसऽआबृतः सहप्रमाऽऋषयः सप्त दैब्याः । पूर्बेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रत्थ्यो न रश्मीन् ॥४॥

यज्जाग्रतो दूरमु॒दैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥

यत् प्रज्ञानमु॒त चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥७॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्। येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥८॥

यस्मिन्नृचः साम यजूं गुँ षि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥९॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥१०॥

द्वितीय अध्यायः

हरिः ॐ
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि� सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १॥

पुरुष एवेद� सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४॥

ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५॥

तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६॥

तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दा�सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७॥

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ १०॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या⍰ शूद्रो अजायत ॥ ११॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२॥

नाभ्या आसीदन्तरिक्ष⍰ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँऽकल्पयन् ॥ १३॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६॥

॥ इति शुक्लयजुर्वेदीयपुरुषसूक्तं सम्पूर्णम्॥

तृतीय अध्यायः

(अप्रतिरथ सूक्त)

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥ऋ १०/१०३/१॥

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥2॥

स इषुहस्तैः स निषङ्गिभिर्वशी संस्त्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्यु1 ग्रधन्वा प्रतिहिताभिरस्ता ॥3॥

बृहस्पते परि दीया रथेन रक्षोहामित्रॉ अपबाधमानः ।
प्रभञ्जन्त्सेना:प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥4॥

बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहवान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥5॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥6॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनःपृतनासषाळययुध्यो3ऽस्माकं सेना अवतु प्र युत्सु॥7॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥8॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥9॥

उध्दर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषा:॥10॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे बभवन्त्वस्मॉ उ देवा अवता हवेषु ॥11॥

अमीषं चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥12॥

संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दृश्च्य बनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वम् युधो नर इषुहस्तेन बृष्णा ॥ २॥

सऽइषुहस्तैः सनिषङ्गिभिर्बशी सगुं स्रष्टा सयुध ऽइन्द्रो गणेन ।
सगुं सृष्टजित्सोमपा बाहु शर्ध्युग्र धन्बा प्रति हिताभिरस्ता ॥ ३॥

बृहस्पते परिदीया स्थेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन् त्सेनाः प्रमृणोयुधा जयन्नस्माकमेद्ध्यवितारथानाम् ॥ ४॥

बलबिज्ञान स्थबिरःप्प्रबीरः सहस्वान् बाजी सहमान ऽउग्रः ।
अभिबीरो ऽअभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोबित् ॥५ ॥

गोत्रभिदं गोबिदं बज्रबाहुम् जयन्तमज्म प्रमृणन्त मोजसा ।
इम गुं सजाताऽअनुबीर यध्वमिन्द्र गुं सखायो अनुसगुंरभध्वम् ॥६॥

अभि गोत्राणि सहसा गाहमानो दयोबीरः शतमन्युरिन्द्रः ।
दुश्च्यबनः पृतनाषाढयुध्योऽस्माकगुं सेनाऽअबतु प्रयुत्सु ॥७ ॥

इन्द्रऽआसान्नेता बृहस्पति र्द्दक्षिणा यज्ञः पुरऽएतुसोमः ।
देबसेनानामभि भञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वोग्रम् ॥८॥

इन्द्रस्यब्बृष्णोब्बरुणस्यराज्ञऽआदित्यानाम् मरुतागुं शर्द्धऽउग्रम् ।
महामनसाम् भुबनच्च्यबानां घोषो देबानां जयता मुदस्थात् ॥९ ॥

उर्द्धर्षय मघबन्नायुधान् न्युत्सत्वनाम् मामकानाम् मनागुंसि ।
उद्बृत्रहन्न्बाजिनां ब्बाजिनान्न्युद्द्रथानान् जयतां य्यन्तु घोषाः ॥१० ॥

अस्माकमिन्द्रः समृतेषुद् ध्वजेष्वस्माकं याऽइषबस्ता जयन्तु ।
अस्माकंबीरा ऽउत्तरे भबन्त्वस्माँ ऽउदेबाऽअबताहबेषु ॥११॥

अमीषां चित्तम् प्रतिलोभयन्ती गृहाणाङ्गान्न्यप्वे परेहि ।
अभि प्रेहि निर्द्दहहृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

अबसृष्टा परापत शरब्ये ब्रह्म स गुं शिते ।
गच्छामित्रान् प्रपद्यस्व मामीषां कञ्चनोच्छिषः ॥१३॥

प्रेताजयता नरऽइन्द्रोबः शर्म्मयच्छतु ।
उग्राबः सन्तु बाहबोनाधृष्या यथासथ ॥१४॥

असौयासेनामरुतः परेषामभ्यैतिनऽओजसा स्पर्द्धमाना ।
तां गुहत तमसा पब्रतेन यथामीऽअन्योऽअन्यन्नजानन् ॥१५॥

यत्रबाणाः सम्पतन्ति कुमारा बिशिखाऽइब ।
तन्नइन्द्रो बृहस्पतिरदितिः शर्म्मयच्छतु बिश्वाहा शर्म्मयच्छतु ॥१६॥

मर्म्माणिते बर्म्मणा च्छादयामि सोमस्त्वा राजाऽमृतेनानुबस्ताम् ।
उरोर्ब्बरीयोब्बरुणस्ते कृणोतु जयन्तन्त्वानुदेबामदन्तु ॥१७॥

चतुर्थोऽध्यायः

(मैत्र सूक्त)

ॐ बिभ्राड् बृहत् पिबतु सोम्म्यम् मद्ध्वायुर्द्धदयज्ञपता बबिह्रुतम् ।
बातजूतोयोऽअभिरक्षति त्मनाप्रजाः पुपोषपुरुधा ब्बिराजति ॥ १ ॥

उदुत्यं जातबेदसं देबं बहन्ति केतबः ।
दृशेबिश्वाय सूर्य्यम् ॥ २ ॥

येनापाबक चक्षसा भुरन्यन्तं जनाँ ऽअनु । त्वं बरुण पश्यसि ॥ ३ ॥

दैब्याबद् ध्वर्य्युऽआगत गुं रथेन सूर्य्य त्वचा ।
मद्ध्वा यज्ञ गुं समञ्जाथे ।
तम् प्रक्तनथाऽअयं बेनश्चित्रं देबानाम् ॥ ४ ॥

तम् प्रक्तनथा पूर्बथा बिश्वथेमथा ज्येष्ठतातिं बर्हिषद गुं स्वर्बिदम् ।
प्रतीचीनं बृजनं दोहसे धुनिमाशुं जयन्तमनुयासु बर्द्धसे ॥ ५ ॥

अयं बेनश्चोदयत्पृश्नि गर्भा ज्योतिर्जरायू रजसोबिमाने ।
इममपागुं सङ्गमे सूर्य्यस्य शिशुं न बिप्रा मतिभीरिहन्ति ॥ ६ ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्ष गुँ सूर्यऽआत्मा जगतस्तस्थुषश्च ॥ ७ ॥

आनऽइडाभि र्बिदथेसुशस्ति बिश्वानरः सबितादेबऽएतु ।
अपियथायुबानो मत्सथा नो बिश्वं जगदभि पित्त्वे मनीषा ॥ ८ ॥

यदद्य कच्च वृत्रहन्नुदगा ऽअभि सूर्य्य ।
सर्वं तदिन्द्र ते वशे ॥ ९ ॥

तरणि: विश्व दर्शतो ज्योतिष्कृदसि सूर्य्य।
विश्वमाभासि रोचनम् ॥ १० ॥

तत् सूर्य्यस्य देवत्वं तन्न महित्वं मद्ध्या कर्त्तो र्विततगुँ सञ्जभार ।
यदेदयुक्त हरितः सधस्थादाद् द्रात्री वासंस्तनुते सिमस्मै ॥ ११ ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रुपं कृणुते द्योरुपस्थे ।
अनन्तमन्न्यद् द्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ १२ ॥

बण्महाँ । ऽअसि सूर्य्य बडादित्य महाँ । ऽअसि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ । ऽअसि ॥१३॥

बट् सूर्य्य श्रवसा महाँ । ऽअसि सत्रा देव महाँ । ऽअसि ।
मन्न्हा देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥१४॥

श्रायन्तऽ इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमानऽ ओजसा प्रतिभागन्न दीधिम ॥१५॥

अद्यादेवाऽ उदिता सूर्य्यस्य निरगुँ हसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽ उतद्यौः ॥१६॥

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१७॥

पञ्चमोऽअध्यायः

(रुद्र सूक्त)

ओं नमो भगवते रुद्राय ||
नमस्ते रुद्र मन्यव उतोत इषवे नमः बाहुभ्यामुत ते नमः | १|
या ते' रुद्र शिवा तनूरघोराऽपा'पकाशिनी |
तया' नस्तनुवा शन्त'मया गिरि'शंताभिचा'कशीहि |२ |
यामिषुं' गिरिशंत हस्ते बिभर्ष्यस्त'वे |
शिवां गि'रित्र तां कु'रु मा हिगुँ'सीः पुरु'षं जग'त् | ३ |
शिवेन वच'सा त्वा गिरिशाच्छा' वदामसि |
यथा' नः सर्वमिज्जग'दयक्ष्मगुँ सुमना अस'त् | ४ |

अध्य'वोचदधिवक्ता प्र'थमो दैव्यो' भिषक् |
अहीगुँ'श्च सर्वान्"जंभयन् सर्वा"श्च यातुधान्योऽधराचीः परा सुव | ५|

असौ यस्ताम्रो अरुण उत बभ्रुः सु'मंगळः |

ये चेनगुँ रुद्रा अभितो’ दिक्षु श्रिताः स’हस्रशोऽवैषागुँ हेड’ ईमहे | ६|

असौ यो’ऽवसर्प’ति नीळ’ग्रीवो विलो’हितः |
उतैनं’ गोपा अ’दृशन्नदृ’शन्नुदहार्य्यः’ स दृष्टो मृ’डयाति नः | ७ |

नमो’ अस्तु नीळ’ग्रीवाय़ सहस्राक्षाय़ मीढुषे” |
अथो ये अ’स्य़ सत्वा’नोऽहं तेभ्यो’ऽकरं नमः’ | ८ |

प्रमु’ञ्च धन्व’नस्त्वमुभय़ोरार्त्न्योर्ज्यम् |
याश्च ते हस्त इष’वः परा ता भ’गवो वप | ९ |

विज्य़ं धनुः’ कपर्दिनो विश’ल्य़ो बाण’वाँ उत |
अने’शन्नस्य़ या इष’व आभुर’स्य़ निषङ्गथिः’ | १०|

या ते’ हेतिर्मी’ढुष्टम हस्ते’ बभूव’ ते धनुः’ |
तय़ाऽस्मान्विश्वतस्त्वम’य़क्ष्मय़ा परि भुज | ११|

परि’ ते धन्व’नो हेतिरस्मान् वृ’णक्तु विश्वतः’ |
अथो य इ’षुधिस्तवारे अस्मन्नि धेहि तम् | १२ |

अवतत्य़ धनुष्ट्वगुँ सहस्राक्ष शतेषुधे |
निशीर्य्य़’ शल्य़ानां मुखा’ शिवो नः’ सुमना’ भव | १३ |

नमस्त आय़ुधाय़ानातताय़ धृष्णवे” |
उभाभ्य़ा’मुत ते नमो’ बाहुभ्य़ां तव धन्व’ने | १४|

मा नो’ महान्त’मुत मा नो’ अर्भकं मा न उक्ष’न्तमुत मा न’ उक्षितम् |
मा नो’वधीः पितरं मोत मातरं’ मा नः प्रिया़स्तन्वो’ रुद्र रीरिषः | १५|

मा न’स्तोके तन’य़े मा न आयु’षि मा नो गोषु मा नो अश्वे’षु रीरिषः |
मा नो बीरान् रुद्र भामिनो बधीर्हबिष्मन्तः सदमित् त्वा हबामहे | १६|

नमो हिर’ण्य़ बाहवे सेनान्ये’ दिशां च पत’य़े नमो
नमो’ वृक्षेभ्यो हरि’केशेभ्यः पशूनां पत’य़े नमो
नमः’ शस्पिञ्ज’राय़ त्विषी’मते पथीनां पत’य़े नमो
हरि’केशाय़ोपवीतिने’ पुष्टानां पत’य़े नमः | १७|

नमो’ बभ्लुशाय़’ व्याधिनेऽन्ना’नां पत’य़े नमो
नमो भवस्य़’ हेत्यै जग’तां पत’य़े नमो
नमो’ रुद्राय़ा’ततायिने क्षेत्रा’णां पत’य़े नमो
नमः’ सूताय़ाह’न्त्यै वना’नां पत’य़े नमः | १८|

नमो रोहि’ताय़ स्थपत’य़े वृक्षाणां पत’य़े नमो
नमो’ भुवंतय़े’ वारिवस्कृता-य़ौष’धीनां पत’य़े नमो
नमो’ मन्त्रिणे’ वाणिजाय़ कक्षा’णां पत’य़े नमो
नम’ उच्चैर्घो’षाय़ाक्रन्दय़’ते पत्तीनां पत’य़े नमः | १९|

नमः कृत्स्नाय़तय़ा धाव’ते सत्त्व’नां पत’य़े नमो नमः’
सह’मानाय़ निव्याधिन’ आव्याधिनी’नां पत’य़े नमो
नमो निषङ्गिणे” ककुभाय़’ स्तेनानां पत’य़े नमो

नमो’ निचेरवे’ परिचरायारण्यानां पत’ये नमः | २०|

नमो वञ्च’ते परिवञ्च’ते स्तायूनां पत’ये नमो
नमो’ निषङ्गिण’ इषुधिमते’ तस्क’राणां पत’ये नमो नमः’
सृकाविभ्यो जिघांसद्भ्यो मुष्णतां पत’ये नमो
नमो’ऽसिमद्भ्यो नक्तञ्चर’द्भ्यो बिकृन्तानां पत’ये नमः | २१|

नम’ उष्णीषिणे’ गिरिचराय’ कुलुञ्चानां पत’ये नमो
नम इषु’मद्भ्यो धन्वायिभ्य’श्च वो नमो
नम’ आतन्वानेभ्यः’ प्रतिदधा’नेभ्यश्च वो नमो
नम’ आयच्छ’द्भ्योऽस्यद्-भ्य’श्च वो नमः | २२|

नमोबिसृजद्भ्यो विध्य’द्-भ्यश्च वो नमो
नमः’ स्वपद्भ्यो जाग्र’द्-भ्यश्च वो नमो
नमः शया’नेभ्य आसी’नेभ्यश्च वो नमो
नमस्तिष्ठ’द्भ्यो धाव’द्-भ्यश्च वो नमः | २३ |

नमः सभाभ्यः’ सभाप’तिभ्यश्च वो नमो
नमोऽश्वेभ्योऽश्व’पतिभ्यश्च वो नमो
नम’ आव्याधिनी”भ्यो विविध्य’न्तीभ्यश्च वो नमो
नम उग’णाभ्यस्तृगुँहतीभ्यश्च’ वो नमः | २४ |

नमो’ गणेभ्यो’ गणप’तिभ्यश्च वो नमो
नमो व्राते”भ्यो व्रात’पतिभ्यश्च वो नमो
नमो’ गृत्सेभ्यो’ गृत्सप’तिभ्यश्च वो नमो

नमो विरू’पेभ्यो विश्वरू’पेभ्य़श्च वो नमः | २५ |

नमः’ सेना”भ्यः सेनानिभ्य़’श्च वो नमो
नमो’ रथिभ्योऽरथेभ्य़’श्च वो नमो
नमः’ क्षत्तृभ्य़ः’ संग्रहीतृभ्य़’श्च वो नमो
नमो’ महद्भ्यो अर्भकेभ्य़’श्च वो नमः | २६ |

नमस्तक्ष’भ्यो रथकारेभ्य़’श्च वो नमो’
नमः कुला’ळेभ्य़ः कर्मारे”भ्य़श्च वो नमो
नमो’ निषादेभ्य़ः पुंजिष्टे”भ्य़श्च वो नमो
नमः श्वनिभ्यो मृगयुभ्य़श्च वो नमः | २७ |

नमः श्वभ्य़ः श्वप’तिभ्य़श्च वो नमो
नमो’ भवाय़’ च रुद्राय़’ च
नमः’ शर्वाय़’ च पशुपत’य़े च
नमो नीळ’ग्रीवाय़ च शितिकण्ठा’य़ च | २८ |

नमः’ कपर्दिने’ च व्यु’प्तकेशाय़ च
नमः’ सहस्राक्षाय़’ च शतध’न्वने च
नमो’ गिरिशाय़’ च शिपिविष्टाय़’ च
नमो’ मीढुष्ट’माय़ चेषु’मते च | २९ |

नमो” ह्रस्वाय़’ च वामनाय़’ च
नमो’ बृहते च वर्षी’य़से च
नमो’ वृद्धाय़’ च सवृधे च

नमो ऽग्र्याय च प्रथमाय’ च | ३० |

नम’ आशवे’ चाजिराय’ च
नमः शीघ्र्याय च शीभ्या’य च
नम’ ऊर्म्या’य चावस्वन्या’य च
नमो नादेयाय च द्वीप्या’य च | ३१ |

नमो” ज्येष्ठाय’ च कनिष्ठाय’ च
नमः’ पूर्वजाय’ चापरजाय’ च
नमो’ मध्यमाय’ चापगल्भाय’ च
नमो’ जघन्या’य च बुध्न्याय च | ३२ |

नमः’ सोभ्या’य च प्रतिसर्या’य च
नमो याम्या’य च क्षेम्या’य च
नमः श्लोक्या’य चाऽवसान्या’य च
नम’ उर्वर्या’य च खल्या’य च | ३३ |

नमो वन्या’य च कक्ष्या’य च
नमः’ श्रवाय’ च प्रतिश्रवाय’ च
नम’ आशुषे’णाय चाशुर’थाय च
नमः शूरा’य चावभेदिने च | ३४ |

नमो’ बिल्मिने’ च कवचिने’ च
नमो’ वर्मिणे’ च वरूथिने’ च
नमः’ श्रुताय’ च श्रुतसे’नाय च

नमो’ दुन्दुभ्या’य चाहनन्या’य च | ३५ |

नमो’ धृष्णवे’ च प्रमृशाय’ च
नमो’ निषङ्गिणे’ चेषुधिमते’ च
नम’स्तीक्ष्-णेष’वे चायुधिने’ च
नमः’ स्वायुधाय’ च सुधन्व’ने च | ३६ |

नमः स्रुत्या’य च पथ्या’य च
नमः’ काट्या’य च नीप्या’य च
नमः कूल्याय च सरस्याय च
नमो’ नादेयाय’ च वैशन्ताय’ च | ३७ |

नमः कूप्या’य चावट्या’य च
नम बिध्र्याय चातप्या’य च
नमो’ मेघ्या’य च विद्युत्या’य च
नमो वर्ष्या’य चावर्ष्याय’ च | ३८ |

नमो वात्या’य च रेष्म्याय च
नमो’ वास्तव्या’य च वास्तुपाय’ च
नमः सोमा’य च रुद्राय’ च
नम’स्ताम्राय’ चारुणाय’ च | ३९ |

नमः’ शङ्गबे च पशुपत’ये च

नम’ उग्राय’ च भीमाय’ च

नमोऽग्रेवधाय’ च दूरेवधाय’ च

नमो’ हन्त्रे च हनी’यसे च

नमो’ वृक्षेभ्यो हरि’केशेभ्यो नम’स्ताराय |४०|

नमः शंभवाय च मयोभवाय च

नमः’ शङ्कराय’ च मयस्कराय’ च

नमः’ शिवाय’ च शिवत’राय च |४१|

नमः’ पार्य्या’य चावार्य्या’य च

नमः’ प्रतर’णाय चोत्तर’णाय च

नमस्तीर्थ्या’य च कूल्या’य च

नमः शष्प्या’य च फेन्या’य च |४२|

नमः’ सिकत्या’य च प्रवाह्या’य च

नमः’ किगुंशिळाय’ च क्षय’णाय च

नमः’ कपर्दिने’ च पुलस्तये’ च

नम’ इरिण्या’य च प्रपथ्या’य च |४३|

नमो ब्रज्याय च गोष्ठ्या’य च

नमस्तल्प्या’य च गेह्या’य च

नमो” हृदय्या’य च निवेष्प्या’य च

नमः’ काट्या’य च गह्वरेष्ठाय’ च |४४|

नमः शुष्क्या’य च हरित्या’य च

नमः’ पागुँ सव्या’य च रजस्या’य च

नमो लोप्या'य चोलप्या'य च
नम' ऊर्व्या'य च सूर्व्या'य च |४५|

नमः' पर्णाय च पर्णशदाय च
नमोउद्गुरमा'णाय चाभिघ्नते च
नम' आखिदते च प्रखिदते च
नम' इषुकृद्भ्यो' धनुष्कृद्भ्य'श्च वो नमो
नमो' वः किरिकेभ्यो' देवानागुँ हृद'येभ्यो
नमो' विचिन्वत्केभ्यो नमो' विक्षीणत्केभ्यो नम' आनिर्हतेभ्यः |४६|

द्रापे अन्ध'सस्पते दरि'द्रनीळ'लोहित |
आसां प्रजानामेषां प'शूनां मा भेर्माऽरोङ्मो च नः किंचनाम'मत् |४७|

इमा रुद्राय' तवसे' कपर्दिने" क्षयद्वी'राय प्र भ'रामहे मतिः |
यथा' शमस'द् द्विपदे चतु'ष्पदे विश्वं' पुष्टं ग्रामे' अस्मिन्नना'तुरम् |४८|

या ते' रुद्र शिवा तनूः शिवा विश्वाहा भेषजी |
शिवा रुतस्य' भेषजी तया' नो मृड जीवसे |४९|

परि नो रुद्रस्य' हेतिर्वृ'णक्तु परि' त्वेषस्य' दुर्मति र'घायोः |
अव' स्थिरा मघव'द्भ्यस्तनुष्व मीढ्-बस्तोकाय तन'याय मृड |५०|

मीढु'ष्टम शिव'तम शिवो नः' सुमना' भव |
परमे वृक्ष आयु'धं निधाय कृत्तिं वसा'न आ च'र
पिना'कं बिभ्रदा ग'हि |५१|

विकि'रिद विलो'हित नम'स्ते अस्तु भगवः |
यास्ते' सहस्रगुँ' हेतय़ोऽन्य़मस्मन्नि वपन्तु ताः |५२|

सहस्रा'णि सहस्रशो बा'ह्वोस्तव' हेतय़ः' |
तासामीशा'नो भगवः पराचीना मुखा' कृधि | ५३ |

असंख्य़ता सहस्रा'णि ये रुद्रा अधि भूम्य़ा"म् |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५४ |

अस्मिन्-म'हत्य़'र्णवे"ऽन्तरि'क्षे भवा अधि' |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५५ |

नीळ'ग्रीवाः शितिकण्ठा दिवगुँ' रुद्रा उप'श्रिताः |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५६ |

नीळ'ग्रीवाः शितिकण्ठाः शर्वा अधः, क्ष'माचराः |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५७ |

ये वृक्षेषु' सस्पिञ्ज'रा नीळ'ग्रीवा विलो'हिताः |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५८ |

ये भूतानामधि'पतय़ो विशिखासः' कपर्दि'नः |
तेषागुँ' सहस्रयोजनेऽव धन्वा'नि तन्मसि | ५९ |

ये पथां प’थिरक्ष’य़ ऐळबृदा’ आय़ुर्युधः |
तेषागुँ’ सहस्रयोजनेऽव धन्वा’नि तन्मसि | ६० |

ये तीर्थानि’ प्रचर’न्ति सृकाहस्ता निषङ्गिणः’ |
तेषागुँ’ सहस्रयोजनेऽव धन्वा’नि तन्मसि | ६१ |

येऽन्ने’षु विविध्य’न्ति पात्रे’षु पिब’तो जनान्’ |
तेषागुँ’ सहस्रयोजनेऽव धन्वा’नि तन्मसि | ६२ |

य एताव’न्तश्च भूय़ागुँ’सश्च दिशो’ रुद्रा वि’तस्थिरे |
तेषागुँ’ सहस्रयोजनेऽव धन्वा’नि तन्मसि | ६३ |

नमोऽस्तु रुद्रेभ्य़ो ये दिवि येषां वर्षमिष’वः |
तेभ्य़ो दश प्राचीर्दश’ दक्षिणा दश’ प्रतीचीर्दशोदी’चीर्दशोर्ध्वाः |
तेभ्य़ो नमो अस्तु ते नोऽबन्तुते नो मृडय़न्तु ते यं द्विष्मो यश्च’ नो द्वेष्टि
तमेषां जम्भे’ दध्मः | ६४-१ |

नमोऽस्तु रुद्रेभ्य़ो ये”ऽन्तरि’क्षे येषां वात इष’वः |
तेभ्य़ो दश प्राचीर्दश’ दक्षिणा दश’ प्रतीचीर्दशोदी’चीर्दशोर्ध्वाः |
तेभ्य़ो नमो अस्तु ते नोऽबन्तुते नो मृडय़न्तु ते यं द्विष्मो यश्च’ नो द्वेष्टि
तमेषां जम्भे’ दध्मः | ६४-२ |

नमोऽस्तु रुद्रेभ्य़ो ये पृ’थिव्य़ां येषामन्नमिष’वः |
तेभ्य़ो दश प्राचीर्दश’ दक्षिणा दश’ प्रतीचीर्दशोदी’चीर्दशोर्ध्वाः |

तेभ्य़ो नमो अस्तु ते नोऽबन्तुते नो मृडय़न्तु ते यं द्विष्मो यश्च’ नो द्वेष्टि तमेषां जम्भे’ दध्मः | ६४-३ |

षष्ठ अध्याय़ः

(महच्छिर [सोम])

बय़ं सोमब्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ १ ॥

एष ते रुद्र भागः सहस्वस्त्राऽम्बिकय़ा तं जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥ २ ॥

अब रुद्रमदीमहय़ब देबत्र्यम्बकम् । यथानो बस्य़सस्कर
दय़थानः श्रेय़सस्कर दय़थानो ब्य़बसाय़य़ात् ॥ ३ ॥

भेषजमसि भेषजङ्गबेऽश्वाय़ पुरुषाय़ भेषजम् ।
सुखम्मेषाय़ मेष्यै ॥ ४ ॥

त्र्य़म्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥
त्र्य़म्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामृतः ॥ ५ ॥

एतत्ते रुद्राऽबसन्तेन परोमूजबतोऽतीहि ।
अबततधन्वा पिनाकाबसः कृत्तिबासाऽआहिगुँ सन्नः
शिबोऽतीहि ॥ ६ ॥

त्र्यायुषं जमदग्नेः कश्य़पस्य़ त्रायुषम् ।

यद्देवेषु त्रायुषं तन्नोऽस्तु त्र्यायुषम् ॥ ७ ॥

शिबोनामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा माहिगुँसिः ।
निबर्त्तयाम् म्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुबीर्य्याय ॥ ८ ॥

सप्तम अध्यायः

(जटा)

ॐ उग्रश्च भीमश्चद्ध्वान्तश्च धुनिश्च ॥
सासह्वाँ श्चाभियुग्वा च विक्षिप: स्वाहा ॥ १ ॥

अग्नि गुँ हृदये नाशनि गुँ हृदयाग्रेण पशुपतिं कृत्स्न हृदयेन भबं य्यक्ना ।
शर्बं मतस्नाब्भ्यामीशानं मन्युना महादेबमन्तः
पर्शब्येनोग्रं देबं बनिष्ठुना बसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ २ ॥

उग्रँल्लोहितेन मित्र गुँ सौब्रत्येन रुद्रं दौर्ब्रत्येनेन्द्रं पक्रीडेन मरुतोबलेन साद्ध्यान् प्रमुदा । भबस्यकण्ठ्यगुँ रुद्रस्यान्तः पार्श्वम् महादेबस्य यकृच्छर्वस्यवनिष्ठः पशुपतेः पुरीतत् ॥ ३ ॥

लोमभ्यः स्वाहा लोमभ्यः स्वाहा , त्वचे स्वाहा त्वचेस्वाहा ।
लोहिताय स्वाहा लोहिताय स्वाहा, मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा ।

मागुं सेभ्यः स्वाहा, मागुं सेभ्यः स्वाहा
स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा
अस्थभ्यः स्वाहा अस्थभ्यः स्वाहा
मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा
रेतसे स्वाहा पायबे स्वाहा ॥ ४ ॥

आय़ासाय़ स्वाहा प्राय़ासाय़ स्वाहा संय्य़ासाय़ स्वाहा बिय़ासाय़ स्वाहोद्य़ासाय़ स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय़ स्वाहा शोकाय़ स्वाहा ॥ ५ ॥

तपसे स्वाहा तप्य़ते स्वाहा तप्य़मानाय़ स्वाहा तप्ताय़ स्वाहा धर्माय़ स्वाहा । निष्कृत्य़ै स्वाहा प्राय़श्चित्य़ै स्वाहा भेषजाय़ स्वाहा ॥ ६ ॥

यमाय़ स्वाहा अन्तकाय़ स्वाहा मृत्य़वे स्वाहा । ब्रह्मणे स्वाहा ब्रह्महत्य़ायै स्वाहा बिश्वेभ्य़ोदेबेभ्य़ः स्वाहा द्य़ावापृथिबीभ्य़ागुं स्बाहा ॥ ७ ॥

<u>अष्टम अध्याय़ः</u>

(चमकाध्यायः)

वाजश्च मे प्रसवश्च मे
प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे
स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे
ज्योतिश्च मे स्व श्च मे यज्ञेन कल्पन्ताम् ॥ १॥

प्राणश्च मेऽपानश्च मे
व्यानश्च मेऽसुश्च मे चित्तं च म ऽआधीतं च मे
वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे

बलं च मे यज्ञेन कल्पन्ताम् ॥ २॥

ओजश्च मे सहश्च म ऽआत्मा च मे तनूश्च मे शर्म च मे वर्म च मे
ऽङ्गानि च मेऽस्थीनि च मे परूंषि च मे
शरीराणि च म ऽआयुश्च मे
जरा च मे यज्ञेन कल्पन्ताम् ॥ ३॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे
भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे
वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे
वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४॥

सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे
विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे
जातं च मे जनिष्यमाणं च मे सूक्तं च मे
सुकृतं च मे यज्ञेन कल्पन्ताम् ॥ ५॥

ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे
दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे
शयनं च मे सूषा च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥ ६॥

यन्ता च मे धर्त्ता च मे क्षेमश्च मे धृतिश्च मे
विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे
सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥ ७॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे
कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे
भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥ ८॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे
घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे
कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम् ॥ ९॥

रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे
विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे
कूयवं च मे ऽक्षितं च मे ऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥ १०॥
वित्तं च मे वेद्यं च मे भूतं च मे भबिष्यच्च मे
सुगं च मे सुपत्थ्यं च म ऽऋद्धं च म ऽऋद्धिश्च मे
क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥ ११॥

व्रीहियश्च मे यवाश्च मे माषाश्च मे
तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे
प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे
गोधूमाश्च मे मसुराश्च मे यज्ञेन कल्पन्ताम् ॥ १२॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे
सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे
ऽयश्च मे श्यामं च मे लोहं च मे
सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥ १३॥

अग्निश्च म आपश्च मे वीरुधश्च म
ओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे
ग्राम्याश्च मे पशवऽ आरण्याश्च मे
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥ १४॥

वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे
ऽर्थश्च म एमश्च म ऽइत्त्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥ १५॥

अग्निश्च मऽ इन्द्रश्च मे सोमश्च म ऽइन्द्रश्च मे
सविता च म ऽइन्द्रश्च मे सरस्वती च म ऽइन्द्रश्च मे
पूषा च म ऽइन्द्रश्च मे बृहस्पतिश्च म ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥
१६॥

मित्रश्च म ऽइन्द्रश्च मे वरुणश्च म ऽइन्द्रश्च मे
धाता च म ऽइन्द्रश्च मे त्वष्टा च म ऽइन्द्रश्च मे
मरुतश्च म ऽइन्द्रश्च मे विश्वे च मे देवा ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥
१७॥

पृथिवी च मऽ इन्द्रश्च मेऽन्तरीक्षं च मऽ इन्द्रश्च मे
द्यौश्च मऽ इन्द्रश्च मे समाश्च मऽ इन्द्रश्च मे
नक्षत्राणि च मऽ इन्द्रश्च मे दिशश्च मऽ इन्द्रश्च मे
यज्ञेन कल्पन्ताम् ॥ १८॥

अगुँशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म

उपागुंशुश्च मेऽन्तर्यामश्च म ऽऐन्द्रवाय़वश्च मे
मैत्रावरुणश्च मऽ आश्विनश्च मे प्रतिप्रस्थानश्च मे
शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १९॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽ
ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे
निष्केबल्यश्च मे साबित्रश्च मे सारस्वतश्च मे
पात्क्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥ २०॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे
द्रोणकलशश्च मे ग्रावाणश्च मे अधिषवणे च मे
पूतभृच्च मऽ आधवनीयश्च मे वेदिश्च मे
बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्य्यश्च मे
प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽ दितिश्च मे
दितिश्च मे द्यौश्च मे ऽङ्गुलय़ः शक्करय़ो दिशश्च मे
यज्ञेन कल्पन्ताम् ॥ २२ ॥

ब्रतश्चमऽ ऋतबश्च मे तपश्च मे संबत्सरश्च मे
ऽहोरात्रेऽउर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥

एकाचमे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे
सप्त च मे सप्त च मे नव च मे नव च म
ऽएकादश च म ऽएकादश च मे ऽत्रयोदश च मे त्रयोदश च मे

पंचदश च मे पंचदश च मे सप्तदश च मे सप्तदश च मे
नवदश च मे नवदश च म ऽएक विगुँशतिश्च मऽ एक विगुँशतिश्च मे
त्रयोविगुँशतिश्च मे त्रयोविगुँशतिश्च मे
पंचविगुँशतिश्च मे पंचविगुँशतिश्च मे सप्तविगुँशतिश्च मे
सप्तविगुँशतिश्च मे नवविगुँशतिश्च मे नवविगुँशतिश्च मऽ
एकत्रिगुँशच्च मऽ एकत्रिगुँशच्च मे त्रयस्त्रिगुँशच्च मे
यज्ञेन कल्पन्ताम् ॥ २४ ॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे
षोडश च मे षोडश च मे विगुँशतिश्च मे विगुँशतिश्च मे
चतुर्विगुँशतिश्च मे चतुर्विगुँशतिश्च मे ऽष्टाविगुँशतिश्च मेऽ ष्टाविगुँशतिश्च मे
द्वात्रिगुँशच्च मे द्वात्रिगुँशच्च मे षट्त्रिगुँशच्च मे षट्त्रिगुँशच्च मे
चत्वरिगुँशच्च मे चत्वरिगुँशच्च मे चतुश्चत्वारिगुँशच्च मे
चतुश्चत्वारिगुँशच्च मेऽष्टाचत्वारिगुँशच्च मे यज्ञेन कल्पन्ताम् ॥ २५ ॥

त्र्यविश्च मे त्र्यवी च मे
दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे
पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे
तुर्य्यवाट् च मे तुर्य्यौही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥

पष्ठवाट् च मे पष्ठौही च म
ऽउक्षा च मे वशा च मऽ ऋषभश्च मे वेहच्च मे
ऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥ २७ ॥

व्वाजाय स्वाहा प्रसवाय स्वाहा ऽपिजाय स्वाहा

क्क्रतवे स्वाहा ब्वसवे स्वाहाऽहर्पतये स्वाहा ह्ने मुग्धाय स्वाहा मुग्धाय वैन गुँ शिनाय स्वाहा ब्विनगुँशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुबनस्य पतये स्वाहा ऽधिपतये स्वाहा प्रजापतये स्वाहा । इयन्तेराण्मित्राय यन्तासि यमन ऽउर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याय ॥ २८ ॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतागुं श्रोत्रं यज्ञेन कल्पतां वाग्-यज्ञेन कल्पतां मनो यज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पता गुं स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् । स्तोमश्च यजुश्च ऽऋक् च साम च बृहच्च रथन्तरश्च । स्वर्देवाऽअगन्मामृता ऽअभूम प्रजापतयेः प्रजाऽअभूम बेट् स्वाहा ॥ २९ ॥

<u>शान्त्याध्यायः</u>

ऋचं बाचं प्रपद्ये । मनो यजुः प्रपद्ये । साम प्राणं प्रपद्ये । चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥ यजुर्वेद 36.1

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु । शं नो भवतु भुवनस्य यस्पतिः ।। यजुर्वेद/३६/२

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्यः धीमहि । धियो यो नः प्रचोदयात्

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ १ ॥ (यजु. 36।4)

कस्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु॥

अभीषुणः सखीनामविता जरितृणाम् । शत भवास्यूतये।

कया त्वम् न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर॥ ८.०९३.१९

इन्द्रो विश्वस्य राजति। शं नो अस्तु द्विपदे शं चतुष्पदे ॥

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो वृहस्पतिः। शं नो विष्णुरुरुक्रमः।

शन्नो वातः पवतां शन्नस्तपतु सूर्यः. शन्नः कनिक्रदद देवः पर्जन्यो अभिवर्षतु.

अहानि शं भवन्तु नः शँ रात्रीः धीयताम् । शं न इन्द्राग्नी भवतामवोभिः शं नऽइन्द्रवरुणा रातहव्या । शं न ऽ इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ।

शन्नो देवी रभिष्टय आपो भवन्तु पीतये ।शङ्जो रभि स्रवन्तु नः

स्योना पृथिवी नो भवानृक्षरा निवेशनी यच्छा नः शर्म स प्रथाः

आपोहिष्टा मयो भुवः। तान ऊर्जे दधातन। महे रणाय चक्षसे।

यो वः शिवतमो रसः। तस्य भाजयतेह नः। उशतीरिव मातरः।

तस्मा अरं गमाम वः। यस्य क्षयाय जिन्वत। आपो जनयया च नः।

द्यौः शान्तिरन्तरिक्षँ शान्ति:,. पृथ्वी शान्तिराप: शान्तिरोषधय: शान्ति:। वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शान्ति:,. सर्वँ शान्ति:, शान्तिरेव शान्ति:, सा मा शान्तिरेधि॥

दृते दृ दृँह मा मित्रस्या मा चक्षुषा सर्वाणि भूतीनि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा ।
समीक्षामहे।। (यजु० ३६-१८)

दृते दृ हमा ज्योक्ते संदृशि जीव्यासम्। ज्याक्ते संदृशि जीव्यासम्

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वचिषे। अन्यौस्तेऽअस्मन्तपन्तु हेतय: पावकोऽअस्मभ्य ॐ शिवो भव।
नमस्ते ऽअस्तु विद्युते नमस् ते स्तनयित्नवे । नमस् ते भगवन्न् अस्तु यतः स्वः समीहसे ॥

यतो-यतः समीहसे ततो नो ऽ अभयं कुरु ।
शं नः कुरु प्रजाभ्यो ऽभयं नः पशुभ्यः ॥

सुमित्रिया न ऽ आप ऽ ओषधयः सन्तु दुर्मित्रियास् तस्मै सन्तु यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

तच् चक्षुर् देवहितं पुरस्ताच् छुक्रम् उच् चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम्ँ शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतम् अदीनाः स्याम शरदः शतं भूयश् च शरदः शतात् ॥

<u>स्वस्ति अध्यायः</u>

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

पयः पृथिव्यां पयऽओषधीषु, पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम्

विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा

अग्निर्देवता , र्वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रूद्र देवताऽऽदित्या देवता मरुतो देवता विश्वदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ (यजुर्वेद - 14 / 20)

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः
भवे भवे नातिभवे भवस्व माम् भवोद्भवाय नमः ।
वामदेवाय नमो ज्येष्ठाय नमः । श्रेष्ठाय नमो रुद्राय नमः ।
कालाय नमः । कलविकरणाय नमः । बलाय नमः । बलविकरणाय नमः ।
बलप्रमथाय नमः । सर्वभूतदमनाय नमो मनोन्मनाय नमः ।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः
सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।

ॐ शिवोनामासि स्वधिस्तॆ पिता नमस्तॆ अस्तु मामाहिग्ंसी: ।
निवर्त्तयाम्यां युषे ऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ।

विश्वानि देव सवितर्दुरितानि परा सुव ! यद् भद्रंतन्न आ सुव

ॐ द्यौः शान्तिरन्तरिक्षँ शान्ति:,. पृथ्वी शान्तिराप: शान्तिरोषधय: शान्ति:। वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शान्ति:,. सर्वँ शान्ति:, शान्तिरेव शान्ति:, सा मा शान्तिरेधि॥

ॐ सर्वेषाम् वा एष वेदानां रसो यत् साम ।
सर्वेषाम् एवैनम् एतद् वेदानांश् रसे नाभिषिञ्चति ।

ॐ शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु ।

।। इति रुद्राष्टाध्यायी समाप्ता ।।

यदक्षर पदभ्रष्टं मात्राहीनञ्च यद् भबेत् ।
तत्सर्बं क्षम्यतां देब प्रसीद परमेश्वर ।।

अनेन रुद्राभिषेक कर्मणा श्री भवानी शंकर महारुद्रः प्रियताम् ,
न मम ।

-----------------x0x----------------